ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. VIII Oct,2015 - Mar, 2016 No. 2

वर्षम् - ८ अक्टूवर, २०१५- मार्च, २०१६ अङ्कः - द्वितीयः

# प्राचीसुधा

## PRACI SUDHA

'प्राचीसुधा' सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ॥

सम्पादकः सञ्चालकश्च
डॉ॰ विश्वनाथस्वाईँ

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा
PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
PURI, ODISHA

प्राचीसुधा/अक्टूवर-२०१५ – मार्च-२०१६
ISSN 2249 - 2313
द्वितीयसंख्या

## विषयसूची


| पृष्ठाङ्काः | विषयाः | लेखकाः |
|---|---|---|
| ३. | सम्पादकीयम् | डॉ.विश्वनाथस्वाईं |
| ५. | श्रीजगन्नाथाष्टकरमाभाष्यम् | आचार्यः(डॉ.)विन्ध्येश्वरप्रसादहिमांशुः |
| ९. | दीर्घजीवनम् | महामहोपाध्यायत्रिपाठी डॉ.सुधाकराचार्यः |
| ११. | निम्बार्कदर्शने जीवस्वरूपम् | डॉ.अशोकचन्द्रगौड शास्त्री |
| १४. | लावण्यबोधः | डॉ.शिवप्रसादबेहेरा |
| १८. | अथर्ववेदे शान्तिपुष्टिकर्माणि | डॉ.काह्नुचरणपण्डा |
| २४. | मनुस्मृतौ कर्त्तव्यशीलनम् | डॉ.मेधाकुमारी |
| २७. | श्रीमद्भागवते मुक्तितत्त्वम् | डॉ.मखलेशकुमारः |
| ३१. | महाभारते धर्मः | डॉ.सुमन्तकुमारदासः |
| ३५. | प्राचीनभारते स्त्रीशिक्षा | डॉ.वृन्दावनपात्रः |
| ४१. | वैदिकवाङ्मये पर्यावरणम् | डॉ.महेश झा |
| ४५. | स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् | डॉ.निर्मला पाणिग्राही |
| ४८. | भारतीयदर्शनदर्पणः | डॉ.विष्णुप्रसाददाशः |
| ५२. | भारतीयसंस्कृतौ सङ्गीतम् | डॉ.द्वारिकानाथत्रिपाठी |
| ५६. | नामकरणसंस्कारः | राजेश्री डॉ.महन्तः रामसुन्दरदासः |
| ६०. | सर्गप्रलयप्रक्रियाविमर्शः | डॉ.विष्णुपदमहापात्रः |
| ६५. | स्मृतिशास्त्रे शिवतत्त्वविमर्शः | डॉ.देवीपदरथः |
| ६९. | आत्मसंस्कारप्रकाशः | डॉ.युधिष्ठिरसाहुः |
| ७३. | वेददिशा कारणतावादविचारः | डॉ.वृन्दावनदाशः |
| ७९. | ऋग्वेदसंहितायां मित्रावरुणौ | डॉ.शत्रुघ्नपाणिग्राही |
| ८४. | संदेशः कामगीतायाः | डॉ.भारतेन्दुपाण्डेयः |
| ८६. | गीतगोविन्दपूर्ववर्त्तिसाहित्ये श्रीराधा | ममता राउतराय |
| ९२. | भारतीयसमाजे भ्रूणहत्या | अनुसूया पृष्टिः |
| ९५. | सामसु मानसिकोपचार एवमन्तराभवः | डॉ.राजवीरः |
| ९६. | अर्थवद्ग्रहणे नानार्थकस्य.... | डॉ.विनोदकुमार झा |
| ९८. | श्रीमद्भागवते श्रीकृष्णः | डॉ.रुद्रेशभट्टः |
| १०२. | श्रीमद्भगवद्गीतायां धर्मः | डॉ.श्रीमाचलपण्डा |
| १०६. | धर्मशास्त्रे ऋणादानव्यवहारपदम् | डॉ.दयानिधिमिश्रः |
| १०८. | Declaration | |




# श्रीजगन्नाथाष्टक"रमा"भाष्यम्

*आचार्यः (डॉ.)विन्ध्येश्वरप्रसादहिमांशुः*

कृपापारावारः सजलजलदश्रेणीरुचिरो
रमावाणीरामः स्फुरदमलपद्मेक्षणमुखः ।
सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो
जगन्नाथस्वामी नयनपथगामी भवतु मे ।।४।।

द्वन्द्वमोहविनिर्मुक्तः युक्तः कविः निर्गुणं निराकारं निरवयवं यत् औपनिषदं पुराणं कविरूपं ब्रह्म तत् सगुणं साकारं सौम्यं मानुषरूपं सावयवं माधुर्यार्पितं सहृदयं करुणाभूमिं करुणापगां वर्णयन् आह – "कृपापारावार"इति । क्रप् + अङ्प्रत्ययः, सम्प्रसारणञ्चेति कृपा । कृपायाः करुणायाः दयायाः अनुकम्पायाः अनुक्रोशस्य घृणायाः कारुण्यस्य पारावारः समुद्रः सागरः पयोनिधिः तोयनिधिः पयोराशिः । षष्ठीतत्पुरुषः । पारम् आवृणोति इति पारावारः । वृङ्=वरणे इति धातोः कर्मणि 'अण्' प्रत्ययः । 'उपपदमतिङ्' इति उपपदसमासः । पारम् अपारम् अस्य इति पारावारः । पारावारौ अस्य स्त इति वा । अर्शादिभ्योऽच् । "कृपापारावार" इति जगन्नाथस्य विशेषणम् । कृपापारावारः जगन्नाथः संसारसमुद्रं वबन्ध । तत्र सेतुबन्धनं श्रुत्वा दुष्टः दुर्मुखः दशमुखः रावणः क्रोधान्धः सन् व्याकुलः बभूव । तद्यथा आह कविकुलकुमुदकलाधरः –

बाँध्यो बननिधि नीरनिधि जलधि सिंधु बारीस ।
सत्य तोयनिधि कंपति उदधि पयोधि नदीस ।।

– रामचरितमानस, लङ्काकाण्ड, दोहा-५ ।

करुणापारावार इत्यत्र रूपकं वा । करुणजनः करुणमूर्त्तिः करुणाधिकः वा । जगन्नाथः करुणाधनः भवति करुणया एव अवतरति रक्षति च । तदुक्तं – "कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि" । इति । यद्वा - "स्मृताऽपि तरुणातपं करुणया हरन्ती नृणामभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् । कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनीमदीयमतिचुम्बिनी भवतु काऽपि कादम्बिनी ।।"इति । एवञ्च "न धनं न राज्यसम्पदं नहि विद्यामिदमेकमर्थये ।

# अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् – एक: विचार:

डॉ. विनोदकुमार झा

"प्र ऊढ:" इति दशायां "प्रादूहोढोढ्येषैष्येषु" इति वार्तिकेन वृद्धौ सत्यां "प्रौढ:" इति रूपं सम्पन्नतां याति । अत्र मनसि प्रश्न: समुदेति यत् यथा "प्रौढ:" इत्यत्र वृद्धिर्भवति तथैव "प्र+ऊढवान्" इत्यत्रापि "ऊढ"शब्दस्य सत्त्वात् "प्रादूहोढोढ्येषैष्येषु" इति वार्तिकेन वृद्धौ सत्यां "प्रौढवान्" इति रूपं सम्पन्नं भवेत् "प्रोढवान्" इत्यस्य स्थाने । "प्रोढवान्" इत्यत्र कथं गुण: क्रियते । अत्र उत्तरं वर्तते – एका परिभाषाऽस्ति – "अर्थवद्ग्रहणे नानर्थकस्य" इति । अत्र "ग्रह्"धातो: "कृत्यल्युटो बहुलम्"[1] इति सूत्रेण बाहुलकात् कर्तरि अर्थे ल्युट्-प्रत्यये सति निष्पन्नस्य "ग्रहण"शब्दस्य स्वीकारे "ग्रहण"शब्दार्थो भवति – बोधक: । "अर्थवद्ग्रहणे" इत्यस्य तद्घटितशास्त्रे लक्षणायां सत्यां परिभाषार्थो भवति – अर्थबोधकपदघटितशास्त्रे अनर्थकस्य ग्रहणं न भवति । एवम्प्रकारेण अर्थबोधक-ऊढपदघटिते "प्रादूहोढोढ्येषैष्येषु" इति शास्त्रे अनर्थकस्य ऊढशब्दस्य ग्रहणं न भवति । अथवा भावार्थके "ग्रहण"पदस्वीकारे "सम्भवति" इति पदम् अध्याहार्य "सति सम्भवे अर्थवद्ग्रहणे अनर्थकस्य ग्रहणं न भवति" इत्यर्थोऽपि स्वीकर्तुं शक्यते । अस्यां परिस्थितौ "प्र ऊढ:" इति दशायां "ऊढ"शब्दस्य अर्थवत्त्वाद् उपर्युक्तवार्तिकेन वृद्धिर्भवति । "प्र+ऊढवान्" इत्यत्र "ऊढ"शब्दस्य अनर्थकत्वात् न जायते वृद्धिरिति । उक्तञ्चापि – "समुदायो हि अर्थवान् न तु तदेकदेश: ।" इति ।

अत्र परिभाषायां मूलं वर्तते सार्थकशब्दस्य अर्थत्यागे प्रमाणाभावत्वम् । अत्रेदं ज्ञेयं यत् "स्वं रूपं शब्दस्याऽशब्दसंज्ञा" इति सूत्रे स्वशब्द आत्मीयवाची वर्तते । आत्मीयवाचिना स्वशब्देन लौकिकाऽर्थो गृह्यते तथा च रूपशब्देन स्वरूपम् अर्थात् शब्दस्य स्वरूपम् । यथा "घट"पदस्य स्वरूपं वर्तते – "घ्+अ+ट्+अ" इति । एवम्प्रकारेण कस्यापि शब्दस्य अर्थद्वयं वर्तते – १. लौकिकाऽर्थ:, २. शब्दगताऽनुपूर्वी अर्थात् शब्द: । लोके लौकिकाऽर्थस्य ग्रहणं भवति । यथा – घटमानय । अत्र "घट"पदेन लोके प्रसिद्धस्य कम्बुग्रीवादिमत: पदार्थस्य आनयनं भवति न तु घटपदानुपूर्विणां "घ्+अ+ट्+अ" इत्येतेषाम् । लोके लौकिकाऽर्थो विशेष्य: शब्दश्च विशेषणम् । व्याकरणशास्त्रं शब्दशास्त्रमस्ति । अत्र शास्त्रे शब्दस्य प्रधानता भवति । अत्र लौकिकाऽर्थो विशेषणं, शब्दश्च विशेष्य:, विपरीतताश्रयणे शास्त्रीयकार्यं न सम्भवति, दाहकशक्तिविशिष्टस्य अग्नेरनन्तरं "ढक्"प्रत्ययस्य विद्यमानत्वाभावात् । अत एव "अग्नेर्ढक्"[2] सूत्रस्य अर्थो भवति – सार्थक-अग्निशब्दात् "ढक्"प्रत्ययो भवेत् । अत:



यस्मिन् सूत्रे विशिष्टस्वरूपस्य उच्चारणं वर्तते । यथा "प्रादूहोढोढ्येषैष्येषु" इति वार्तिके "ऊढ" इति, "व्रश्चभ्रस्ज..."[3] इति सूत्रे "राज्" इति । तत्र उच्चारितपदेन उपस्थितस्य अर्थस्य शब्दं प्रति विशेषणरूपेण अन्वये सम्भवे शास्त्रीयकार्यमसम्पादिते च सति उच्चारितपदेन उपस्थितस्य अर्थस्य त्यागकरणम् उचितं नास्ति । अत्र किमपि प्रमाणमपि नास्ति । तस्मात् प्रमाणाभावात् सार्थकशब्दस्यैव ग्रहणं भवति अर्थबोधकपदघटितशास्त्रे न तु अनर्थकस्य ।

अत्र परिभाषायाम् अर्थेन अन्वयव्यतिरेकाभ्यां कल्पितस्य शास्त्रीयस्य अर्थस्य ग्रहणं भवति वाक्यार्थस्य मुख्यत्वात् । तत्सत्त्वे तत्सत्त्वम् अन्वय: । तदसत्त्वे तदसत्त्वं व्यतिरेक: ।

इयं परिभाषा वर्णबोधकपदघटितशास्त्रे न प्रवर्तते । यतोहि "लुनाति" इत्यत्र लकारस्य स्थाने तिङादेश: कथं न भवति इति प्रश्ने सति "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्" इति स्वकीय-उत्तरेण महाभाष्यकारो स्वयमेव सन्तुष्टो न भवति वर्णबोधकपदघटितशास्त्रे अस्या: परिभाषाया: अप्रवृत्तित्वात् । वर्णबोधकपदघटितशास्त्रं यथा – "लस्य"[4] । सहैव वर्णबोधकपदघटितशास्त्रे "अर्थवद्ग्रहणे नानर्थकस्य" परिभाषाया: प्रवृत्तिर्न भवति । अत एव "अत इञ्"[5] इत्यादिषु सूत्रेषु प्रातिपदिकस्य विशेषणीभूतेन वर्णबोधकेन "अत"पदेन तदन्तग्रहणं भवति, तथा च "दाक्षि:" इत्यादिषु स्थलेषु "अत इञ्" इत्यनेन "इञ्" प्रत्ययो भवति । अत्र अकारान्त-दक्ष-आदिपदेषु अकार: निरर्थको वर्तते । तेन निरर्थक-अकारेण तदन्तविधिर्भवति; तस्मादेव "अला एव अनर्थकेन तदन्तविधि:" इति उक्तम् । अन्यथा अर्थवद्ग्रहणे नानर्थकस्य परिभाषाया: वर्णबोधकपदघटितशास्त्रे प्रवृत्तौ "दाक्षि:" इत्यादिषु स्थलेषु, यत्र अकार: अनर्थको वर्तते तत्र "अत इञ्" इत्यस्य प्राप्तिरेव नास्ति । अत: वर्णविधिं परित्यज्य अन्यत्र अर्थवद्ग्रहणे अनर्थकस्य ग्रहणं न भवति ।

"अर्थवद्ग्रहणे नानर्थकस्य" परिभाषाया: अपवादभूता परिभाषा "अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ते ।" इति ।

सन्दर्भा: –

१. पा.अ.सू.* – ३.३.११३
२. पा.अ.सू. – ४.२.३३
३. पा.अ.सू. – ८.२.३६
४. पा.अ.सू. – ३.४.७७
५. पा.अ.सू. – ४.१.९५
* पाणिनीय: अष्टाध्यायी-सूत्रपाठ:

—०—

प्रोफेसर, व्याकरणविभाग:,
श्रीसोमनाथसंस्कृतयूनिवर्सिटी (गुजरात)